M. T. B. COLLEGE, SURAT
*Manuscripts Library*
No. Ref.
Sec. 709
Title: Subhasita Vrola
Katha

709

सुखरात्री व्रत कथा

| | |
|---|---|
| Sukharàtri Vrata | Title Katha |
| | Author |
| | Editor |
| Sam. 163- | Year, Vols. |
| | Publisher |
| 709 | Remarks |

नं. १

709

# सुखरात्रिव्रतकथा

सत्यश्रीवैजनाथायनमः॥ ॥श्रीगणेशायनमः॥नारदौ॰
उवाच॥ ॥येनाखिलसुरूपास्फसुभगासुप्रजास्त्रिया॥पतिव्रत
पराब्रह्मनृतद्भुतब्रूहिमेप्रभो॥१॥ब्रह्मोवाच॥ ॥शृयतांब्रा
ह्मणाश्रेष्ठसुखरात्रिव्रतंशुभं॥यन्मयाकस्यचिन्नोक्तंहरस्यशि



वशमिदं॥१॥कुर्जस्यतद्व्रतेनस्पंवदश्यांतपोधनायस्यावरण
मात्रेणस्त्रियःसौभाग्यमाप्नुयुः॥२॥स्त्रियासाद्वैजगद्योनिः प्र
तेविष्णुःसुखान्वितः॥तस्यारात्रौजनैस्तस्मा कार्यसुखसुप्ति
का॥३॥तस्यावातुमयैवंतैर्निगवन्पंचरंगकैः॥निजालये
जीवदात्रीलिखित्वासुखरात्रिका॥५॥ब्रह्मविष्णुशिवादीनां

मूर्द्धिन्यविलिखेततः॥सौभाग्यहेतवेभर्तुरनुज्ञांप्रतिगृह्यच॥६॥
॥व्रतार्थंकन्ययेत्तासांपूजोपकरणानिच॥ततःसुगंधिद्रव्येण
गात्रमुद्वर्तयेत्ततः॥७॥स्त्रीभिःसुखेनिस्नानंकारयेद्द्विजस
त्तम॥स्नात्वावस्त्रंमनोहारिपरिधापयथाविधि॥८॥सुखरात्र्यासु
प्रतिष्ठांकारयित्वाद्विजन्मना॥पूजनीयाविधानेनगंधपुष्पादताद्रि



भिःस्त्रीभिर्मुदासंयुताभिःसुखरात्र्यादिदेवताः॥सुखरा
त्रिग्रहस्थायादेवतालिखितामया॥१०॥पूजागृहंतुमद्दत्वाताः प्र
यंतुमेसुखं॥सुखरात्रिनमस्तुभ्यंजीवरात्रेसुखप्रदे॥११॥
शिवप्रियेगृहाणेमांपूजांमेरत्नवालकान्यारूपंदेहिजयंदेहि
देहिदेवेशिवंधनं॥१२॥पूजान्प्रयच्छमेकामांसंमतांमांवसादे

रात्रौ॥इतिसंपूज्यतोदेवीगीतवाद्यनिस्वनैः॥१३॥महोत्सव
त्रकुर्वतिदीपमालाप्रदीपयेत्॥ततोनीराजनंकृत्वास्त्री
निरनुत्तमं॥१५॥विप्राःसंतोषणीयास्त्रवस्त्रालंकारभोजनै
॥दक्षिणांवतोदत्वाब्राह्मणायथाविधिः॥१६॥नक्तंसहरी
ड्नायंदीपवृक्षायधेनुया॥घृतंसस्यासितंस्त्रीनिरापुरारोग्य



वृद्धयेशुद्धातद्दिनंयद्दिहर्षेणत्रयातिमुनिपुंगवातस्यसंव
त्सरंहर्षेनवत्येवनसंशयः॥१७॥एवंकृत्वाविधानेनसुख
रात्रिव्रतंशुभं॥सुखसंतानमारोग्यंसंततिंचिरजीविनं॥
॥१८॥ ॥नारदउवाच॥ ॥केनवादौपुरावीर्णमर्त्येकेनप्र
काशितं॥स्यात्रत्यक्कथंमेत्रभवान्तत्त्वाग्यमज्ञवान्

॥१९॥ ॥ब्रह्मोवाच॥ ॥अवंतीविषयेकश्चिद्द्विजआसीत्सम
द्धिमान्॥द्यूतपानरतोनित्यधर्ममार्गविवर्जितः॥२०॥पित्रो
रकरोन्नित्यंमातृवंचनकारकः॥तस्यपत्नीस्वरूपावधर्म
मार्गरताभवत्॥२१॥ततःकालेव्यतिक्रान्तेकालेजरयापरि
पीडितौ॥पितरौस्वर्गतौतस्यअभूतांवत्ससत्तम॥२२॥ततः



संतोषमनवाप्तोनिश्चित्यनारदाममदधानंधनंसर्वे की
डिष्यद्यूतमित्युत॥२३॥विनापतिस्यपत्नीतुवेश्यासूरपोस्त
दा॥ततोदाहादिकंपित्रोनकृतंतेनवद्विजा॥२४॥यःकश्चि
द्वदतेलोकेसपिंडीकरणादिकं॥त्वयाकृपंनाक्रियतेपित्रो
रितितदाद्विजा॥२५॥ततस्ताताडयत्येवयदानोवचीत्यु

नः॥संवत्सरदिनत्रासेपत्नीसंताड्यभूरिशः॥२८॥मद्यानीदुष्ट
मांसानिगृहेभुंजीतानित्यशः॥एवंविप्रोमहापापीद्यूतेनित्यं
रतोभवत्॥२७॥एकदाकार्तिकस्यास्यकृष्णपंचदशीह्यभू
त्॥वैश्यास्सर्वव्रतंचक्रुर्यथोक्तंभवतेमया॥२८॥विप्रोप्यसौ
तदावेश्यागेहंक्रीडार्थमागपत्॥वेश्यापूजयतोदृष्ट्वासुख



रांचीशुभान्वितांश्च॥२९॥विप्रोरोषसमायुक्तस्तासांगेहाद्विनिर्ग
तः॥तास्तदाधनलोभाद्धित्वानीयचतंद्विजं॥३०॥क्रीडांचक्रु
स्ततःपश्चाद्दिदमूचुस्मतंद्विजं॥द्यूतक्रीडाविजानासिक्रीडयां
मायधासुखं॥३१॥विप्रोविद्यांविजानातिन्यस्तस्यहृदयेगतां
॥तपोतेतुद्विजेतास्मिन्क्रीडाप्रवृत्तेनिशि॥३२॥जहारच

धनंसवैहस्त्यस्वरथसंकुलम्॥वेश्यानिस्वाडितसंपकुल
जयैवाद्यघोमुखः॥३३॥पत्न्यैकथयामासयथावृत्तंहिदु
खदं॥पतीव्रतप्रभावाद्धिविद्यायापरिपूजिता॥३४॥वेश्यायो
भवनंगत्वाजितंसर्वंक्षणेपुनः॥जित्वागृहंसमागत्यनत्वा
सहमनस्विनी॥३५॥पूजयामासतांदेवीसुखरात्रिशुभप्रदां॥



ततोगत्वागतेनैवसायंतीतायसर्वरी॥१॥ततःप्रत्यूषसम
येपत्नीपप्रच्छनारदा॥अहंविद्याविजानामिग्रस्तस्यहृदयेग
तां॥२॥सोद्यहंविजितस्त्रीभिस्त्यक्तयाप्रतिजितःपुनः॥यतन्मे
संशयंछिंधिकस्येदंकर्मणःफलं॥३॥तत्पत्नीकथयामास
सुखरात्रिप्रभावतः॥मयाशीघ्रंचनसर्वंप्रत्यानीतंपुनस्तदा॥

॥३९॥पत्नीवाक्यंतत्कृत्वाचकारव्रतमादरात्॥ततोव्रत
प्रभावाच्चसंजातंधनसंकुलम्॥धर्ममार्गरताश्चाभूत्तेवि
ष्णुपरंगतः॥ ॥ श्री ॥इतिश्रीपद्मपुराणेसुखरात्रि
व्रतकथासमाप्ता॥ ॥ ॥संवत्१८३२वर्षेभाद्रपदवदि
एकादशीभौमेलिखितंगोकुलनाथनदेणआत्मपठनार्थं



परोपकार्यशुनो॥ ॥दिल्लीश्वरशलेमसाहिराज्येश्रकर
पुरम्मनेयमुनातीरे॥ ॥शुभंभूयात्॥ ॥६॥ ॥छ॥रा
माश्रीगणेशायनमः॥ ॥श्री॥श्री ॥श्री॥श्री॥ ॥ ॥